No. ४३१५-घ

Title वाक्यभेदवादः

Author

Extent ६ Age

Subject

नं० ४३१५-घ

वाक्यभेदवादः

पत्राणि ६ (षट्)

६ नं० ४३१५-घ

नं० ४३१५-च

वाक्यभेदवाद.

पत्राणि ६(षट्)

वाक्यपेद्याद मीमांसा

१२.

श्रीगणेशाय नमः ।। अथ कथं सर्वत्रैव प्रधानैकोद्देशेनानेकविधानेऽत्रैकोद्देशेनैकविधाने वा वाक्यभेद
प्रसक्तिः । विधेरावृत्त्येति चेत् । सैव कथमिति विवेचनीयं । न हि विधित्वं विनान्येन साक्षात्संबध्यते । भा
वनाद्वारेण तु तस्य सकलप्रकारकान्वयो वाच्यः ।। तस्याश्च विधीयमानाया इवानूद्यमानाया अपि सकलप्रका
रकान्वययोग्यत्वाविशेषाच्च यत एवानूद्यमानभावनाद्वारेणानावृत्तस्यापि विधेरनेकप्रकारकान्वयोऽपि
रूपयितुं । एतावत्प्रकारकान्वितयागभावनाविषयिणी प्रवर्त्तनेति । अथ शाब्दबोधवेलायां विशिष्टभाव
नाविषयत्वेनावगतोऽपि विधिः स्वप्रवृत्तिप्रवर्त्तनास्वाभाव्यात्प्राप्ताप्राप्तविवेकेन गुणेषु प्रवर्त्तको वाच्यः । पर
स्परनिरपेक्षेषु यत्र प्रवर्त्तयन्नावर्त्तेतेति चेन्न एषु तु प्रधानयागेषु तदंगेषु चानेकेषु प्रवृत्तिजनना । तेऽपि प्रधा
नविधेरनावृत्तिवदनेकेष्वपि गुणेषु तां जनयतो विधेरनावृत्त्युपपत्तेः । न च प्रधानविधिनैव प्रधानेष्वंगेषु वा
प्रवर्त्तकः । विशिष्टभावनाविधिकल्पितविशेषणविधिभिरेव तेषु प्रवृत्तिजननादिति वाच्यं । प्रधानाना १
मंगानां वानुष्ठापक [redacted] । विध्यंतरकल्पनायां स्वभावेऽस्मृतानां प्रधानोत्पत्तिविधीनामंगविधी

नामेव बलाद्येनानुष्ठापकत्वकल्पनापत्तेः। न चैतदिष्टं। एकविधिप्रयोज्यत्वात्तावेक्रमकल्पनानापत्तेः। अथा
पाततो विशिष्टत्वावा। नाचितप्रवर्त्तनागोचरे शाब्दबोधे जातेपि न तत्रैव विधेः पर्यवसानं यागोद्देशेन गुण
विधिप्रतीतिमंतरेण गुणानां यागांगत्वासिद्धेः। अतो यद्यागं कुर्वीत दध्नेति वचनव्यत्ययाश्रयणेनैव विधेः
पर्यवसानं वाच्यं। ततश्चोद्देशवचनव्यत्ययंतराश्रयणेन गुणांतरं विधौ त्वत्रे द्वेव विध्यावृत्तिरिति चेत् न न क
लंजं न भक्षयेदित्यादिषु विध्यर्थविपर्ययं न आबोधयितुं पलंडुं लंजं न भक्षयेदिति नञ्लक्षणाचितविध्यनुवादवद्यथा
गं कुर्यादिति यागाचितप्रवर्त्तनानुवादे लिङ्संनिधिगुणस्य विधायकत्वाभावेन विध्यनुपपत्तेः। अथैतद्दोषपरि
हाराय यो यागस्तमनेन गुणेन कुर्यादिति वचनव्यत्ययं ~~कसमाश्रयणाद्विध्यावृत्तिरितिचेत्~~ गीकरणेन गुणवि
धानमुच्येत। गुणांतरविधौ चोद्देशवचनव्यत्ययंतराश्रयणाद्विध्यावृत्तिरिति चेत् न भावनाया अपि विधे
यकोटिनिक्षेपेन तस्या अनेकगुणविशिष्टाया विध्यन्वयसंभवेन विध्यनावृत्तेः। अथ विधिभावनयो
रेकप्रत्ययप्रतिपाद्यत्वेन गुणान्वितविधिप्रतिपादनाय तद्बन्धोपबंधे। लिङ्गमुख्यादिति भावनाया विधेय

स्य भवतीति निर्णीतं तृतीयकृतया ज्ञापनेव स्तुतो भावनानुबाधैवेति चेत् आस्तामेवं अनुबाधायाः अपि
भावनायां गुणरूपेण तत्र संबंधसंभवे भावनाद्वारेणैव विधेरपि तत्र संबंधसंभवेनैवकस्यापि वि
धायत्तिसंभवः। न च वाजपेयाधिकरणोक्तं यागस्य गुणफलोभयांतं च संबंध इवेहापि वैरूप्यं प्रसज्येत।
भावनायाः अवैरूप्येणानेककारकान्वयसहत्वस्य तत्रैवाभियुक्तैरुक्तत्वात्। अनेकगुणान्वयेऽवैरूप्य
स्यानाशंक्यत्वाच्च। स्यादेतत्। विधिः सर्वत्र कर्पोऽभ्युद्देश्यविधेययोः संबंधं विधत्ते तेन भावनाया अ
प्राप्तौ तस्याः फलसंबंधं विधत्ते तस्याः प्राप्तौ द्वारकमन्वययोः कर्पोऽभ्युचित् संबंधं विधत्ते। एकस्य च
संबंधिनो द्वाभ्यां अतिसंबंधित्वं सह संबंधत्तेदोवश्यं वाच्यः। एकस्य घटस्य द्रव्यरूपनिरूपितसंयोग
जेदवत्। एकं च संबंधं विधेयमंगीकृत्य निराकांक्षो विधिरपरसंबंधमनाकांक्षो न शक्नोति कर्तुं। अतः
कर्मत्वान्वयेन निराकांक्षस्य यागस्य करणत्वान्वयायावृत्तिवत् संबंधांतरविधानाय विध्यावृत्तिः स्या २
देवेति चेत् न एकस्य स्वर्गस्य षड्भिर्यागैरनेकसंबंधविधाने विध्यावृत्त्यापातात्। न चैकपक्षोत्तरत्वात्

षसां तावतां संबंधानां युगपद्विधेयत्वावगमादनावृत्तिरिति शंक्यं। उच्यते। तत्र संबंधाऽपणेतावत्फलसं-
बंधानामपि युगपदेवविधेयत्वावगमसंभवात्। यथैकस्यानेकैः प्रतिसंबंधिभिः संबंधभेदे सत्यपि
ते संबंधाः शाब्दबोधवेलायां विभिन्नरूपेण बुद्धिस्थास्तद्वद्भवंति यद्यपि प्रतिसंबंधितावच्छेदकानि रू-
पाणि भिन्नानि भवंति। षसां वपायागानां संबंधितावच्छेदकयागत्वरूपमभिन्नमिति तावत्संबंधानामेकरूपेणो-
पस्थितानां संभवत्येकविधिविधेयत्वं गुणानां तु संबंधितावच्छेदकरूपभेदात्तत्संबंधानां नैकविधिविधेय-
त्वं। अत एव विश्वाधिकरणे एकपदोपात्तयोः द्वित्वस्त्रीत्वयोः पशुयागानुवादेन विधौ वाक्यभेदोक्तिः संग-
च्छते षसां यागानामिव द्वित्वस्त्रीत्वयोः संबंधितावच्छेदकरूपैक्याभावात्। भिन्नपदोपात्तयोरपि यजातपुत्रव-
त्सकेशत्वयोर्जातिकावस्थाविशेषरूपैकेन वाक्यभेदपरीहारः संगच्छते इति चेत्। एवं हि संबंधितावच्छे-
दकरूपभेदेन संबंधानां विभिन्नोपस्थितिरेव वाक्यभेदनियामिकेति वाच्यं। तथा च य इष्ट्या पशुना सोमेनेत्य-
त्रेष्टित्वपशुत्वसोमत्वानां विधेयतावच्छेदकानां भेदान्नवैश्यः कामेत्यो दर्शपूर्णमासावित्यत्र च दर्शत्वपूर्णमा-

3 सत्वयोर्विधेयतावच्छेदकयोर्भेदाभेदावुपपद्येते तिसृहृतिप्रयाजानुयाजेष्वप्युक्तरीत्यन्तरोरेकवयोर्धात्व
येवाईते चेत्वेनवन इत्यत्रयत्र प्रयाजत्वानुयाजत्वयोरेकवत्वयोर्धात्वयोश्चोद्देश्यतावच्छेदकयो
र्भेदाभावप्रयोजकाभावात्। अथैतेषु वाक्येषु विधेयतोद्देश्यतावच्छेदकत्वेन प्रतीयमानानामिष्टत्वादिधर्माणां
तदवच्छेदकत्वं परित्यज्य स्वरूपेण कल्पितेन वा पदार्थादिनोपस्थितेन यागत्वादेरेव तदवच्छेदकत्वं स्वीक्रियते
न स्वरूपेण दर्शादिपदार्थानामेवोद्देश्यत्वाद्यंगीकरणान्न वाक्यभेद इति चेत्। न यदि हि सर्वेष्वपि कामेष्वपो दर्श
पूर्णमासावित्यत्र कल्पितेन पदार्थेन । इति यागत्वस्वरूपेण दर्शपूर्णमासयोर्विधेयत्वमंगीक्रियते तदा कल्पित
वस्त्वादिपदार्थेर्हितवस्तुत्वादिरूपेणानेकेषामपि गुणानां प्राप्तकर्मानुवादेनैव विधेयत्वं कुतो नोच्यते
तुल्ये हि यागत्ववस्तुत्वयोरतिप्रसक्तत्वं। अत्रोच्यते। एकपदोपात्तानामनेकेषामुद्देश्यत्वे विधेयत्वे वा
न वाक्यभेदः। उद्देश्यत्वविधेयत्वावच्छेदकयोर्भेदाभेदाभ्यां तत्र न कोपि विशेषः। अतो यदिष्ट्येति वा ३
कामव्यतिरिक्तेषु उक्तोदाहरणेषु द्वंद्वोपात्तानेकविध्युद्देशांगीकारोपि न वाक्यभेदः। यदिष्ट्येति वाक्ये तु इष्ट्या

दिपक्षोपस्थापितानामेकेनश्रुतेनयागेनान्वयग्रहान्नवाक्यभेदइति। कोत्रव्यवस्थायांसाधकोन्वा
यइतिचेन्न श्रूयमाणभावनाकांक्षयासर्वेषांविधेयानामुद्देश्यानांवानामार्थानांकारकद्वारेणान्वयोवाच्यः॥
भावनायैकाकारकंविधेयंकर्मयोद्देश्यमेकमेवापेक्षते। तत्रानेकरूपावच्छिन्नानामेकरूपावच्छिन्नानांवा
नैकेषामेकपदोपात्तानामेककारकान्वयित्वादनेकान्वितमेवंकारकंभावनाकांक्षयागृह्णाती भावनायुक्तंयत्तद्वा
रेणानेकान्वयंप्राप्नोतीति। ननुद्वादशाहेनप्रजाकामंयाजयेदित्यादौसत्यप्येकधातूपादानेकरणानांसमु
च्चयोनसमुच्चितानांकरणत्वमितिषष्ठेऽभिधानादेकपदोपात्तानामेवकारकान्वयित्वेनियमोयुक्तइति
चेन्न (किंततः तादृशस्थलेसुपापूर्वदृष्टत्वानेककारकाणामविरुद्धत्वेनाप्यनेकभावनाविधानेसति एका
भावनैवकारकान्वयेननिराकांक्षीभवतीतिनियमांगीकारेप्रत्ययावृत्त्यनापत्तेः। एवंयत्राग्नेयेदात्रेहस्ता
दावनेकमपिपदंमुख्यवृत्त्यासामानाधिकरण्येनैकमेवार्थमुपस्थापयति तत्रप्रतिप्रातिपदिकंश्रुतयापिवि
नत्वाज्ञातिपदिकार्थोन्वेष्यतीत्यनुरोधेनाभिन्नमेवकारकप्रतिपाद्यतइतिनवाक्यभेदः। एवंपेचदृश्यपहो

यदा रात्रौ यं ग्रहो यदा दिवा। तत्र स्नानं न कुर्वीत दद्याद्दानं न कुत्रचिदित्यादिस्थले स्नानदानाद्यनेक
मपि पदं स्नानयोपरागनिमित्तविहितत्वाद्यनेकरूपावच्छिन्नतया नैव कर्मोपस्थापयति तत्रापि प्रातिपदिका
र्थतावच्छेदकभेदप्रतीत्यनुरोधेन पूर्ववदेकमेव कारकमनेकविभक्तिप्रतिपाद्यमिति न वाक्यभेदः। न चैवं चित्र
यैत्यत्राप्येकैककारकद्वारेणानावृत्त एव विधिश्चित्रत्वस्त्रीत्वे। विदध्यादिति न वाक्यभेदः नयाश्चित्राय दत्वामस्यादि
तिवत् न दधिमधुघृतमित्यादिवत्तत्तद्विधेयैकवाक्यतात्यागात्मकवाक्यभेदप्रयेन वाप्रत्तत्यागीयधानाः स्त्रीत्वेनानुष
क्तत्वविधिः अप्रत्तत्यागस्य फलसंबंधविधिश्चेतिश्चनेकसंबंधविधिनिमित्तवाक्यभेदप्रयेन वा नामधेयत्वसं
भवात्। यत्र तु भिन्नरूपावच्छिन्नानां भिन्नपदोपात्तानां विधेयत्वमुद्देश्यत्वं वा प्रसज्यते तत्र तदुत्तरविभक्तिप्रति
पादितानां कारणमां मे दावश्यंभावद्भावनायां स्तावदन्वयप्रयोजनकानेकां ... पक्षे। यथा प्रवृत्तिः प्रसन्य
तद्वृत्तिभवतिवाक्यभेदः॥ यथा हि सकृदुक्तो यागः कर्मत्वान्वयेन निराकांक्षः करणत्वान्वयं नानाद्वृत्तोपेक्ष
ते एवं सकृदुक्तभावनोद्देश्यत्वेन विधेयेन चकारकेणै। केकेन निराकांक्षा ... विधेयान्तरमुद्दिश्य तरस
नावरुत्तानापेक्षत इत्यसनुभवसिद्धमेतेन नन्वेवं यावज्जीवादिविधौ जीवनादिनिमित्तस्य सर्वं शास्त्रविधि ४

करणप्रयुक्तन्यायेन पापक्षयादिफलस्य चोद्देश्यत्वात्तयोरन्योन्यभिन्नत्वात् भिन्नत्वस्यावच्छिन्नत्वाभिन्नपदोपा
त्तत्वाच्च वाक्यभेदापत्तिः ॥ अथोच्यते द्वयोः फलयोर्निमित्तयोर्वा उद्देश्यत्वे भेदे देवतादाय्यैकेन फलेन निमित्ते
न वानेनैकाङ्कस्य ऽपरान्वयात् निमित्तफलयोरन्वयवशेन तु न तदापत्तिः ॥ निमित्तान्वयसमुद्भूतस्यावश्य
कर्तव्यताबोधस्य फलाकाङ्क्षितैपायकत्वेन तदनुच्छेदकत्वादिति न हि विरुद्धवाक्यस्य यागानुवादेन द्रव्यदे
वताविधौ वाक्यभेदापादनमाकरस्थमेवोपपद्यते द्रव्यदेवतयोर्वा विधौ तदापत्तिः ननु द्रव्य
देवतयोर्विधौ देवतान्वयसमुद्भूतस्य यागकर्तव्यताबोधस्य तादृशद्रव्याकाङ्क्षायां पयकत्वेन तदनुच्छे
दकत्वादिति । मैवं ॥ यावज्जीववाक्ये हि निमित्तफलानुरक्तप्रयोगविधानादाजन्मयवाक्ये कर्तृत्वफला
नुरक्तप्रयोगविधानाद्विवसमभवति वाक्यभेदपरिहारः । यदाग्नेयादिवाक्यस्य तु प्रयोगविधित्वात्तत्र श्रुतयो
र्द्रव्यदेवतयोः कर्त्रादिवत् प्रयोगानुबन्धित्वाभावे प्रयाजाद्यर्थवादकत्वेनैकैकगुणविधायकत्वेन एकेन
विधिना वाक्यद्वयेन नापरगुणविधिः संभवतीत्युभयविधौ स्यादेव वाक्यभेदः । यद्वा यावज्जीववाक्येन श्रुतत्वा
न्निमित्तसंबन्धस्याग्नेयोद्धयोः तत्संबन्धानुगतावश्यकर्तव्यतान्यथानुपपत्त्यैव हेतुताबोधकं वचोऽन्तरं कल्प्यते । विशिष्टविधौ वि
रा शेषविधिवत् । अतः श्रूयमाणगिरिधरोद्देश्यद्वयसंबन्धे बाधकाभावात्तन्न वाक्यभेदः । यदाग्नेयादिवाक्ये तु द्रव्यदेवतया
रन्यतरस्येवापि धर्मस्यैवाविनिगमनात् फलस्य पिसैतस्मिन् वचने काविधिनापरायिव्याक्षेपः शक्यः ॥ न हि नैमित्तिकफलस्य

(द्रव्यदेवतयोरजाद्यार्थत्वं द्रव्यादेस्मित्तयोरबाध
अप्रमाणस्यैव विधिवत्त्वात् ... मात्रो यो न तरोऽन्य प.५)

पापक्षयहेतुत्वेनैव श्रुतद्रव्यदेवतयोरेकस्यापरेण विनाभावोऽस्ति ॥ यत्तु तत्तु द्रव्यदेवतयोः क्रियान्वयित्वा
त्मात्क्रियायां तयोरेकस्य संबंधं विधायनिराकांक्षेण विधिनाऽन्वयतेन नापरसंबंधोऽपि यातुं शक्यत इ
ति भवति तद्विधायां चतुर्थ्यधिः । तथा यदि संबंध फलयोः क्रियान्वयः स्यात्तदा स क्रियायां तदुभयसंबंधे
विधेर्भवेद्विधाव्यापृतिः । न चैवमस्ति । विध्यर्थभूतकर्तव्यता निरूपितव्याप्त्व लोलेकमिति तत्त्वा श्रय
स्यनीवनाहेस्त्वा छत्वाव्याप्तता द्वारेणाविध्यर्थान्वयात् । निमित्तप्रमाणेन तथा प्रियप्रसिद्धेनाहिंसा कुम्भादि
नाविधिसहाश्रितेन स्वप्रकलुषीदोकालिकसामान्याधिकारएवन कर्तव्यता ... व्यापृत्य वा
धयतासमभिव्याहृतेन कर्मणा आवश्यककर्म समाप्यते इति अनुभवयंघमेतत्त्वसहृदयानां । ततश्च निमित्ता
यधिन्त्रस्यपि योधिधेयाकांक्षायां क्रियाफलसंबंधः यस्त्वपि धेय इति जीवनपुत्रजन्मादौ निमित्ते नैमि
त्तिकविदधनित्याक्येन कापिनाश्वमेदः ॥ भवति च प्रातरकर्मा नुवादेनानेक गुणविधि स्यलेतत्त्रनिमित्तत्व
दूकस्यापि विध्यनुबद्धेदकत्वेनानेकविध्यन्तरसंभावात् ॥ भवतु वा ध्याय ... गोणाब्दमेदः कथंस्य तदो
पभयाद्विशिष्टकर्मविध्यानयत्यं पतानेकपदेयुमत्वपनिक्षणा [illegible] युणून विशिष्टकर्मविधानं यथा मा
णाको समाप्तिः । तद्रव्याणुपपत्त्या प्रतिगुणं विशेषणावेध्यानामनेकपांक्तलनादरमेकस्यापि विधिप ५

द्रव्यार्थं यो ऽयमिति कल्पनमिति । अथोच्यते विशिष्टविधित्वेन पर्यवसितानामु, तावता क्रमामालिकृतयावधा
रितानां विशिष्टकर्त्तव्यताका अनुपपत्त्याकालितानां विशेषणानां विधीनां संभवति प्रामाणिकत्वं सकृदाम्ना
तस्यानुविधिप्रसंगस्य हेतुवाक्यार्थपर्यवसानानामुत्पत्तिकल्प्यमानानां ॥ निष्प्रमाणिकत्वं यान प्रमाणको ऽयं विशेषत
इतिमेवं विश्वजितायजेत स्वर्गकामः घतीत्यादावपर्यवसितत्वेनार्थापत्त्या कल्प्यमान स्वर्गकामपदद्वयादिष्प
दर्शनपाते अग्नेअयाज्ञासे स्यादीनामनेकेषामेकरूपशेषाच्च हायोगार्थं वर्णोऽन्यथानुपपत्त्या नतु द्वौ । शेषिष्टे स्यादेः
कल्प्यमानावत्तित्वच्चैको देशेन विध्यहीनेकं श्रवणाच्चान्यथानुपपत्त्या कल्प्यमानानां विधानचावृत्तेः प्रमाणको
टिविशेष संभवात् ॥ नाव्यते चानेकवाक्यपरत्वापत्तनुरित्यादिदोषइयानेकविंगुणविधानायतत्रैणविधि
राम्नायत इतिवक्तुं एवं चास्तकद्वार्थमाणस्य प्रतनुरित्यादिमेवस्त्वदसकृदुचार्यमाणस्य विधिपुत्सयस्य वा
णत्वाद्वयुच्यते केदांतभीवोनचोत्तुल्य दोषमतविशेषणविधीनां आम्नाने प्रभागः स्यादिति न्यायेनोहादिनवेष्वत्रका
णान्यतरत्वानिरनोसत्वाचेदत्यनिवर्त्तेरवश्यंभावात् मतेबृहत्तायर्थेदनामधेयमिति शास्त्रेणपासूपणविध्यालोचनेनच वे
दत्वस्य तेदृशान्यतरत्वव्याप्यत्वावगतेरितिमेवंगायत्र्यां वहिष्ठ्यमितेदि ध्यादेस्त्वर्गकामादिपदकल्पनानाविध्यजिता यामेनेयं
भावयेदिति श्रुतिवाक्यपर्यितार्थस्यतेनविनागामंतरासंभवात् प्रत्युतयतज्ञरित्यादेरावृत्तिकल्पनेविभक्त्यभावस्त्वाकांक्षत्वाभा
वेन भिन्नवाक्यतया निर्णीतानां कथापि कल्पनयाप्येकवाक्यतामनिर्वेहतांयातेअग्नेअमपशोपयादीनां आम्नानस्यान्यथानु
पपद्यमानतेस्यतत्र दृष्टहेतुत्वात्प्रपंचत्वापातनोपि मत्वाक्यत्वनिर्णयेपिस्यार्थानिवशापूर्वकल्पकाक्षणिकार्थस्वीकरणेन

मेयादिवाक्यस्थले

कृत्वा कृता कलयितुं शक्येति तत्र नैराकांक्ष्येण प्रत्यक्षं फलं । यथार्द्धमन्तर्वेदि मिनोत्यर्द्धं बहिर्वेदीति । यदा प्रोक्षणादिवाक्यस्थले तु वि
भज्यमानसाकांक्षत्वेऽपि कृत्वा क्वचित्तदैव प्रतीयमानानां स्वार्थविवक्षामन्तरेणाविशिष्टविषयत्वासंभवादेवं वाक्यस्थानां च पदा
नां भिन्नवाक्यत्वापादकविभज्यान्वयकल्पनेन केवलमर्थापत्त्यनुपपत्त्येनाप्रामाण्यं किं प्रस्तुतेन वाक्यतागौरवपरिहाराय [illegible] वाधि
तमपि न चाप्रामाणिकार्थस्वीकारे भाविनो गौरवस्य परिहाराय प्रथममपरीक्षणाप्रामाण्यकार्यस्वीकरणमुचितमिति स्व
षमाकरेणेवायकाद्यधिकरणादौ च तत्रान्तरे च । तत्र च मत्स्वप्रधानावच्चैः प्रमाणकोटिनवेशसंभव एव दूषकतावीजमुक्तं वा
क्यभेदस्याभ्यच्चारविशिष्टकर्मविधानाश्रयणेऽपि देवताविशिष्टद्रव्यविध्याश्रयणेन शक्यमेकवाक्यत्वमुपपादयितुं रक्त
गाग्न्याश्वयोः संबन्धासिद्धौ विशिष्टद्रव्यसंभवादिति व्याकरणे [illegible] त्वमुपपादितं च भाष्यकारैः ॥ क्वचित्तु तात्प
र्यभेदोऽपि वाक्यभेदस्येत्यपचर्यते यथा तत्प्रवर्तियत्र यागोऽगुह्यादिसम्बन्धपरत्वानुप्रहोमेऽसतः पृथग्विधित्वाश्रयणे । यथा
वामेतरणाधिकरणपूर्वपक्षेऽप्येतारूपाण्येतस्य स्वत्वं यावत्तात्पर्यगौरवं तस्य सतः प्रकृतकर्मानुवादेऽपि वाक्यत्वाश्रयणे तु
त्रविधिप्याययोतरनाप्तेः ॥ तत्राघवाक्यतात्पर्यान्तरकल्पनागौरवदोषत्वनिदानं द्वितीयेऽनुपपत्तिप्रमाणेतत्प्रत्येकं सबाधो
पि क्वचित्त्वविशिष्टविधिगौरवस्य वाक्यभेदत्वोक्तिस्तु दोषत्वसामान्यादुपचारमात्रं प्रकृतवाक्येवाक्यार्थभेदेनापाद
कत्वात् ॥ अक्षरीकृतमनन्तेन वाक्यभेदप्रपंचनं सुखबोधाय साधूनां तेन तुष्यतु केशवः ॥ छ ॥ इति श्रीमदापदेव
सूनुना रचितो वाक्यभेदवादः ॥ [illegible] समाप्तः ॥